श्री दत्त अपराध क्षमापण स्तोत्रं

श्री दत्त अपराध क्षमापण स्तोत्रं

दत्तात्रेयं त्वां नमामि प्रसीद
त्वं सर्वात्मा सर्वकर्ता न वेद |
कोऽप्यंतं ते सर्वदेवाधिदेव
ज्ञाताज्ञातान्मेऽपराधान् क्षमस्व || 1 ||

त्वदुद्भवत्वात्त्वदधीनधीत्वा-
-त्त्वमेव मे वंद्य उपास्य आत्मन् |
अथापि मौढ्यात् स्मरणं न ते मे
कृतं क्षमस्व प्रियकृन्महात्मन् || 2 ||

भोगापवर्गप्रदमार्तबंधुं
कारुण्यसिंधुं परिहाय बंधुं |
हिताय चान्यं परिमार्गयंति
हा मादृशो नष्टदृशो विमूढाः || 3 ||

न मत्समो यद्यपि पापकर्ता
न त्वत्समोऽथापि हि पापहर्ता |
न मत्समोऽन्यो दयनीय आर्य
न त्वत्समः क्वापि दयालुवर्यः || 4 ||

अनाथनाथोऽसि सुदीनबंधो
श्रीशाऽनुकंपामृतपूर्णसिंधो |
त्वत्पादभक्तिं तव दासदास्यं
त्वदीयमंत्रार्थदृढैकनिष्ठां || 5 ||

गुरुस्मृतिं निर्मलबुद्धिमाधि-
-व्याधिक्षयं मे विजयं च देहि |
इष्टार्थसिद्धिं वरलोकवश्यं
धनान्नवृद्धिं वरगोसमृद्धिं || 6 ||

पुत्रादिलब्धिं म उदारतां च
देहीश मे चास्त्वभय हि सर्वतः |
ब्रह्माग्निभूम्यो नम ओषधीभ्यो
वाचे नमो वाक्पतये च विष्णवे || 7 ||

शांताऽस्तु भूर्नः शिवमंतरिक्षं
द्यौश्चाऽभयं नोऽस्तु दिशः शिवाश्च |
आपश्च विद्युत्परिपांतु देवाः
शं सर्वतो मेऽभयमस्तु शांतिः || 8 ||

इति श्रीमद्वासुदेवानंदसरस्वती विरचितं श्री दत्तापराध क्षमापण स्तोत्रं |